बृहदारण्यकोपनिषद्भाष्यम्

। अथ पञ्चमाध्यायस्य प्रथमं ब्राह्मणम् ।

**ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥**

**ॐ शान्तिः शान्तिः शान्तिः॥**

पूर्णमद इत्यादि खिलकाण्डमारभ्यते। अध्यायचतुष्टयेन यदेव साक्षादपरोक्षाद्ब्रह्म, य आत्मा सर्वान्तरः निरुपाधिकः अशनायाद्यतीतः नेति नेतीति व्यपदेश्यः निर्धारितः, यद्विज्ञानं केवलममृतत्वसाधनम् — अधुना तस्यैव आत्मनः सोपाधिकस्य शब्दार्थादिव्यवहारविषयापन्नस्य पुरस्तादनुक्तानि उपासनानि कर्मभिरविरुद्धानि प्रकृष्टाभ्युदयसाधनानि क्रममुक्तिभाञ्जि च; तानि वक्तव्यानीति परः सन्दर्भः; सर्वोपासनशेषत्वेन ओङ्कारो दमं दानं दयाम् इत्येतानि च विधित्सितानि। पूर्णमदः — पूर्णम् न कुतश्चित् व्यावृत्तं व्यापीत्येतत्; निष्ठा च कर्तरि द्रष्टव्या; अद इति परोक्षाभिधायि सर्वनाम, तत् परं ब्रह्मेत्यर्थः; तत् सम्पूर्णम् आकाशवद्व्यापि निरन्तरं निरुपाधिकं च; तदेव इदं सोपाधिकं नामरूपस्थं व्यवहारापन्नं पूर्णं स्वेन रूपेण परमात्मना व्याप्येव, न उपाधिपरिच्छिन्नेन विशेषात्मना; तदिदं विशेषापन्नं कार्यात्मकं ब्रह्म पूर्णात्कारणात्मनः उदच्यते उद्रिच्यते, उद्गच्छतीत्येतत्। यद्यपि कार्यात्मना उद्रिच्यते तथापि यत्स्वरूपं पूर्णत्वम् परमात्मभावं तन्न जहाति, पूर्णमेव उद्रिच्यते। पूर्णस्य कार्यात्मनो ब्रह्मणः, पूर्णं पूर्णत्वम्, आदाय गृहीत्वा आत्मस्वरूपैकरसत्वमापद्य विद्यया, अविद्याकृतं भूतमात्रोपाधिसंसर्गजम् अन्यत्वावभासं तिरस्कृत्य, पूर्णमेव अनन्तरमबाह्यं प्रज्ञानघनैकरसस्वभावं केवलं ब्रह्म अवशिष्यते। यदुक्तम् — 'ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेत् तस्मात्तत्सर्वमभवत्' (बृ. उ. १ । ४ । १०) इति — एषः अस्य मन्त्रस्यार्थः; तत्र 'ब्रह्म' इत्यस्यार्थः 'पूर्णमदः' इति ; इदं पूर्णम् इति 'ब्रह्म वा इदमग्र आसीत्' इत्यस्यार्थः; तथा च श्रुत्यन्तरम् — 'यदेवेह तदमुत्र यदमुत्र तदन्विह' (क. उ. २ । १ । १०) इति; अतः अदःशब्दवाच्यं पूर्णं ब्रह्म, तदेव इदं पूर्णं कार्यस्थं नामरूपोपाधिसंयुक्तम् अविद्यया उद्रिक्तम् तस्मादेव परमार्थस्वरूपात् अन्यदिव प्रत्यवभासमानम् — तत् , यत् आत्मानमेव परं पूर्णं ब्रह्म विदित्वा — अहम् अदः पूर्णं ब्रह्मास्मि इत्येवम्, पूर्णमादाय, तिरस्कृत्य अपूर्णस्वरूपताम् अविद्याकृतां नामरूपोपाधिसम्पर्कजाम् एतया ब्रह्मविद्यया पूर्णमेव केवलम् अवशिष्यते; तथा चोक्तम् 'तस्मात्तत्सर्वमभवत्' इति। यः सर्वोपनिषदर्थो ब्रह्म, स एषः अनेन मन्त्रेण अनूद्यते, उत्तरसम्बन्धार्थम्। ब्रह्मविद्यासाधनत्वेन हि वक्ष्यमाणानि साधनानि ओङ्कारदमदानदयाख्यानि विधित्सितानि, खिलप्रकरणसम्बन्धात् सर्वोपासनाङ्गभूतानि च॥

अत्रैके वर्णयन्ति — पूर्णात् कारणात् पूर्णं कार्यम् उद्रिच्यते; उद्रिक्तं कार्यं वर्तमानकालेऽपि पूर्णमेव परमार्थवस्तुभूतं द्वैतरूपेण; पुनः प्रलयकाले पूर्णस्य कार्यस्य पूर्णताम् आदाय आत्मनि धित्वा पूर्णमेव अवशिष्यते कारणरूपम्; एवम् उत्पत्तिस्थितिप्रलयेषु

त्रिष्वपि कालेषु कार्यकारणयोः पूर्णतैव; सा च एकैव पूर्णता कार्यकारणयोर्भेदेन व्यपदिश्यते; एवं च द्वैताद्वैतात्मकमेकं ब्रह्म। यथा किल समुद्रो जलतरङ्गफेनबुद्बुदाद्यात्मक एव, यथा च जलं सत्यं तदुद्भवाश्च तरङ्गफेनबुद्बुदादयः समुद्रात्मभूता एव आविर्भावतिरोभावधर्माणः परमार्थसत्या एव — एवं सर्वमिदं द्वैतं परमार्थसत्यमेव जलतरङ्गादिस्थानीयम्, समुद्रजलस्थानीयं तु परं ब्रह्म। एवं च किल द्वैतस्य सत्यत्वे कर्मकाण्डस्य प्रामाण्यम्, यदा पुनर्द्वैतं द्वैतमिवाविद्याकृतं मृगतृष्णिकावदनृतम्, अद्वैतमेव परमार्थतः, तदा किल कर्मकाण्डं विषयाभावात् अप्रमाणं भवति; तथा च विरोध एव स्यात्। वेदैकदेशभूता उपनिषत् प्रमाणम्, परमार्थाद्वैतवस्तुप्रतिपादकत्वात्; अप्रमाणं कर्मकाण्डम्, असद्वैतविषयत्वात्। तद्विरोधपरिजिहीर्षया श्रुत्या एतदुक्तं कार्यकारणयोः सत्यत्वं समुद्रवत् 'पूर्णमदः' इत्यादिना इति। तदसत्, विशिष्टविषयापवादविकल्पयोरसम्भवात्। न हि इयं सुविवक्षिता कल्पना। कस्मात्? यथा क्रियाविषये उत्सर्गप्राप्तस्य एकदेशे अपवादः क्रियते, यथा 'अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः' (छा. उ. ८ । १५ । १) इति हिंसा सर्वभूतविषया उत्सर्गेण निवारिता तीर्थे विशिष्टविषये ज्योतिष्टोमादावनुज्ञायते, न च तथा वस्तुविषये इह अद्वैतं ब्रह्म उत्सर्गेण प्रतिपाद्य पुनः तदेकदेशे अपवदितुं शक्यते, ब्रह्मणः अद्वैतत्वादेव एकदेशानुपपत्तेः। तथा विकल्पानुपपत्तेश्च; यथा 'अतिरात्रे षोडशिनं गृह्णाति' (?) 'नातिरात्रे षोडशिनं गृह्णाति' (?) इति ग्रहणाग्रहणयोः पुरुषाधीनत्वात् विकल्पो भवति; न त्विह तथा वस्तुविषये द्वैतं वा स्यात् अद्वैतं वेति विकल्पः सम्भवति, अपुरुषतन्त्रत्वादात्मवस्तुनः, विरोधाच्च द्वैताद्वैतत्वयोरेकस्य। तस्मात् न सुविवक्षिता इयं कल्पना। श्रुतिन्यायविरोधाच्च। सैन्धवघनवत् प्रज्ञानैकरसघनं निरन्तरं पूर्वापरबाह्याभ्यन्तरभेदविवर्जितं सबाह्याभ्यन्तरम् अजं नेति नेति अस्थूलमनण्वह्रस्वमजरमभयममृतम् — इत्येवमाद्याः श्रुतयः निश्चितार्थाः संशयविपर्यासाशङ्कारहिताः सर्वाः समुद्रे प्रक्षिप्ताः स्युः, अकिञ्चित्करत्वात्। तथा न्यायविरोधोऽपि, सावयवस्यानेकात्मकस्य क्रियावतो नित्यत्वानुपपत्तेः; नित्यत्वं च आत्मनः स्मृत्यादिदर्शनात् अनुमीयते; तद्विरोधश्च प्राप्नोति अनित्यत्वे; भवत्कल्पनानर्थक्यं च; स्फुटमेव च अस्मिन्पक्षे कर्मकाण्डानर्थक्यम्, अकृताभ्यागमकृतविप्रणाशप्रसङ्गात्। ननु ब्रह्मणो द्वैताद्वैतात्मकत्वे समुद्रादिदृष्टान्ता विद्यन्ते; कथमुच्यते भवता एकस्य द्वैताद्वैतत्वं विरुद्धमिति? न, अन्यविषयत्वात्; नित्यनिरवयववस्तुविषयं हि विरुद्धत्वम् अवोचाम द्वैताद्वैतत्वस्य, न कार्यविषये सावयवे। तस्मात् श्रुतिस्मृतिन्यायविरोधात् अनुपपन्नेयं कल्पना। अस्याः कल्पनायाः वरम् उपनिषत्परित्याग एव। अध्येयत्वाच्च न शास्त्रार्था इयं कल्पना; न हि जननमरणाद्यनर्थशतसहस्रभेदसमाकुलं समुद्रवनादिवत् सावयवम् अनेकरसं ब्रह्म ध्येयत्वेन विज्ञेयत्वेन वा श्रुत्या उपदिश्यते; प्रज्ञानघनतां च उपदिशति; 'एकधैवानुद्रष्टव्यम्' (बृ. उ. ४।४।२०) इति च; अनेकधादर्शनापवादाच्च 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ. उ. ४।४।१९) इति; यच्च श्रुत्या निन्दितम्, तन्न कर्तव्यम्; यच्च न क्रियते, न स शास्त्रार्थः; ब्रह्मणोऽनेकरसत्वम् अनेकधात्वं च द्वैतरूपं निन्दितत्वात् न द्रष्टव्यम्; अतो न शास्त्रार्थः; यत्तु एकरसत्वं ब्रह्मणः तत् द्रष्टव्यत्वात् प्रशस्तम्, प्रशस्तत्वाच्च शास्त्रार्थो भवितुमर्हति। यत्तूक्तं वेदैकदेशस्य अप्रामाण्यं कर्मविषये द्वैताभावात्, अद्वैते च प्रामाण्यमिति — तन्न, यथाप्राप्तोपदेशार्थत्वात्; न हि द्वैतम् अद्वैतं वा वस्तु जातमात्रमेव पुरुषं ज्ञापयित्वा पश्चात्कर्म वा ब्रह्मविद्यां वा उपदिशति शास्त्रम्; न च उपदेशार्हं द्वैतम्,

जातमात्रप्राणिबुद्धिगम्यत्वात्; न च द्वैतस्य अनृततत्वबुद्धिः प्रथममेव कस्यचित् स्यात्, येन द्वैतस्य सत्यत्वमुपदिश्य पश्चात् आत्मनः प्रामाण्यं प्रतिपादयेत् शास्त्रम्। नापि पाषण्डिभिरपि प्रस्थापिताः शास्त्रस्य प्रामाण्यं न गृह्णीयुः। तस्मात् यथाप्राप्तमेव द्वैतम् अविद्याकृतं स्वाभाविकम् उपादाय स्वाभाविक्यैव अविद्यया युक्ताय रागद्वेषादिदोषवते यथाभिमतपुरुषार्थसाधनं कर्म उपदिशत्यग्रे; पश्चात् प्रसिद्धक्रियाकारकफलस्वरूपदोषदर्शनवते तद्विपरीतौदासीन्यस्वरूपावस्थानफलार्थिने तदुपायभूताम् आत्मैकत्वदर्शनात्मिकां ब्रह्मविद्याम् उपदिशति। अथैवं सति तदौदासीन्यस्वरूपावस्थाने फले प्राप्ते शास्त्रस्य प्रामाण्यं प्रति अर्थित्वं निवर्तते; तदभावात् शास्त्रस्यापि शास्त्रत्वं तं प्रति निवर्तत एव। तथा प्रतिपुरुषं परिसमाप्तं शास्त्रम् इति न शास्त्रविरोधगन्धोऽपि अस्ति, अद्वैतज्ञानावसानत्वात् शास्त्रशिष्यशासनादिद्वैतभेदस्य; अन्यतमावस्थाने हि विरोधः स्यात् अवस्थितस्य; इतरेतरापेक्षत्वात्तु शास्त्रशिष्यशासनानां नान्यतमोऽपि अवतिष्ठते; सर्वसमाप्तौ तु कस्य विरोध आशङ्क्येत अद्वैते केवले शिवे सिद्धे; नाप्यविरोधता, अत एव। अथापि अभ्युपगम्य ब्रूमः — द्वैताद्वैतात्मकत्वेऽपि शास्त्रविरोधस्य तुल्यत्वात्; यदापि समुद्रादिवत् द्वैताद्वैतात्मकमेकं ब्रह्म अभ्युपगच्छामः नान्यद्वस्त्वन्तरम्, तदापि भवदुक्तात् शास्त्रविरोधात् न मुच्यामहे; कथम्? एकं हि परं ब्रह्म द्वैताद्वैतात्मकम्; तत् शोकमोहाद्यतीतत्वात् उपदेशं न काङ्क्षति; न च उपदेष्टा अन्यः ब्रह्मणः; द्वैताद्वैतरूपस्य ब्रह्मणः एकस्यैव अभ्युपगमात्। अथ द्वैतविषयस्य अनेकत्वात् अन्योन्योपदेशः, न ब्रह्मविषय उपदेश इति चेत् — तदा द्वैताद्वैतात्मकम् एकमेव ब्रह्म, नान्यदस्ति इति विरुध्यते। यस्मिन्द्वैतविषये अन्योन्योपदेशः, सः अन्यः द्वैतं च अन्यदेव इति समुद्रदृष्टान्तो विरुद्धः। न च समुद्रोदकैकत्ववत् विज्ञानैकत्वे ब्रह्मणः अन्यत्र उपदेशग्रहणादिकल्पना सम्भवति; न हि हस्तादिद्वैताद्वैतात्मके देवदत्ते वाक्कर्णयोः देवदत्तैकदेशभूतयोः वाक् उपदेष्ट्री कर्णः केवल उपदेशस्य ग्रहीता, देवदत्तस्तु न उपदेष्टा नाप्युपदेशस्य ग्रहीता — इति कल्पयितुं शक्यते, समुद्रैकोदकात्मत्ववत् एकविज्ञानवत्त्वात् देवदत्तस्य। तस्मात् श्रुतिन्यायविरोधश्च अभिप्रेतार्थासिद्धिश्च एवंकल्पनायां स्यात्। तस्मात् यथाव्याख्यात एव अस्माभिः पूर्णमदः इत्यस्य मन्त्रस्य अर्थः॥

*bṛhadāraṇyakopaniṣadbhāṣyam*

*atha pañcamādhyāyasya prathamaṃ brāhmaṇam*

*oṃ pūrṇamadaḥ pūrṇamidaṃ pūrṇātpūrṇamudacyate।*
*pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate॥*
*oṃ śāntiḥ śāntiḥ śāntiḥ॥*

*pūrṇamada ityādi khilakāṇḍamārabhyate। adhyāyacatuṣṭayena yadeva sākṣādaparokṣādbrahma, ya ātmā sarvāntaraḥ nirupādhikaḥ aśanāyādyatītaḥ neti netīti vyapadeśyaḥ nirdhāritaḥ, yadvijñānaṃ kevalamamṛtatvasādhanam — adhunā tasyaiva ātmanaḥ sopādhikasya śabdārthādivyavahāraviṣayāpannasya purastādanuktāni upāsanāni karmabhiraviruddhāni prakṛṣṭābhyudayasādhanāni kramamuktibhāñji ca; tāni vaktavyānīti paraḥ sandarbhaḥ; sarvopāsanaśeṣatvena oṅkāro damaṃ dānaṃ dayām ityetāni ca vidhitsitāni। pūrṇamadaḥ — pūrṇam na kutaścit vyāvṛttaṃ vyāpītyetat; niṣṭhā ca kartari draṣṭavyā; ada iti parokṣābhidhāyi sarvanāma, tat paraṃ brahmetyarthaḥ; tat sampūrṇam ākāśavadvyāpi nirantaraṃ nirupādhikaṃ ca; tadeva idaṃ sopādhikaṃ nāmarūpasthaṃ vyavahārāpannaṃ pūrṇaṃ svena rūpeṇa paramātmanā vyāpyeva, na upādhiparicchinnena viśeṣātmanā; tadidaṃ viśeṣāpannaṃ kāryātmakaṃ brahma pūrṇātkāraṇātmanaḥ udacyate udricyate, udgacchatītyetat। yadyapi kāryātmanā udricyate tathāpi yatsvarūpaṃ pūrṇatvam paramātmabhāvaṃ tanna jahāti, pūrṇameva udricyate। pūrṇasya kāryātmano brahmaṇaḥ, pūrṇaṃ pūrṇatvam, ādāya gṛhītvā ātmasvarūpaikarasatvamāpadya vidyayā, avidyākṛtaṃ bhūtamātropādhisaṃsargajam anyatvāvabhāsaṃ tiraskṛtya, pūrṇameva anantaramabāhyaṃ prajñānaghanaikarasasvabhāvaṃ kevalaṃ brahma avaśiṣyate। yaduktam — 'brahma vā idamagra āsīt tadātmānamevāvet tasmāttatsarvamabhavat' (bṛ. u. 1।4।10) iti — eṣaḥ asya mantrasyārthaḥ; tatra 'brahma' ityasyārthaḥ 'pūrṇamadaḥ' iti; idaṃ pūrṇam iti 'brahma vā idamagra āsīt' ityasyārthaḥ; tathā ca śrutyantaram — 'yadeveha tadamutra yadamutra tadanviha' (ka. u. 2।1।10) iti; ataḥ adaḥśabdavācyaṃ pūrṇaṃ brahma,*

*tadeva idaṃ pūrṇaṃ kāryasthaṃ nāmarūpopādhisaṃyuktam avidyayā udriktam tasmādeva paramārthasvarūpāt anyadiva pratyavabhāsamānam — tat, yat ātmānameva paraṃ pūrṇaṃ brahma viditvā — aham adaḥ pūrṇaṃ brahmāsmi ityevam, pūrṇamādāya, tiraskṛtya apūrṇasvarūpatām avidyākṛtāṃ nāmarūpopādhisamparkajām etayā brahmavidyayā pūrṇameva kevalam avaśiṣyate; tathā coktam 'tasmāttatsarvamabhavat' iti। yaḥ sarvopaniṣadartho brahma, sa eṣaḥ anena mantreṇa anūdyate, uttarasambandhārtham। brahmavidyāsādhanatvena hi vakṣyamāṇāni sādhanāni oṅkāradamadānadayākhyāni vidhitsitāni, khilaprakaraṇasambandhāt sarvopāsanāṅgabhūtāni ca॥*

*atraike varṇayanti — pūrṇāt kāraṇāt pūrṇaṃ kāryam udricyate; udriktaṃ kāryaṃ vartamānakāle'pi pūrṇameva paramārthavastubhūtaṃ dvaitarūpeṇa; punaḥ pralayakāle pūrṇasya kāryasya pūrṇatām ādāya ātmani dhitvā pūrṇameva avaśiṣyate kāraṇarūpam; evam utpattisthitipralayeṣu triṣvapi kāleṣu kāryakāraṇayoḥ pūrṇataiva; sā ca ekaiva pūrṇatā kāryakāraṇayorbhedena vyapadiśyate; evaṃ ca dvaitādvaitātmakamekaṃ brahma। yathā kila samudro jalataraṅgaphenabudbudādyātmaka eva, yathā ca jalaṃ satyaṃ tadudbhavāśca taraṅgaphenabudbudādayaḥ samudrātmabhūtā eva āvirbhāvatirobhāvadharmāṇaḥ paramārthasatyā eva — evaṃ sarvamidaṃ dvaitaṃ paramārthasatyameva jalataraṅgādisthānīyam, samudrajalasthānīyaṃ tu paraṃ brahma। evaṃ ca kila dvaitasya satyatve karmakāṇḍasya prāmāṇyam, yadā punardvaitaṃ dvaitamivāvidyākṛtaṃ mṛgatṛṣṇikāvadanṛtam, advaitameva paramārthataḥ, tadā kila karmakāṇḍaṃ viṣayābhāvāt apramāṇaṃ bhavati; tathā ca virodha eva syāt। vedaikadeśabhūtā upaniṣat pramāṇam, paramārthādvaitavastupratipādakatvāt; apramāṇaṃ karmakāṇḍam, asaddvaitaviṣayatvāt। tadvirodhaparijihīrṣayā śrutyā etaduktaṃ kāryakāraṇayoḥ satyatvaṃ samudravat 'pūrṇamadaḥ' ityādinā iti। tadasat, viśiṣṭaviṣayāpavādavikalpayorasambhavāt। na hi iyaṃ suvivakṣitā kalpanā। kasmāt? yathā kriyāviṣaye utsargaprāptasya ekadeśe apavādaḥ kriyate, yathā 'ahiṃsansarvabhūtānyanyatra tīrthebhyaḥ' (chā. u. 8।15।1) iti hiṃsā sarvabhūtaviṣayā utsargeṇa nivāritā tīrthe viśiṣṭaviṣaye jyotiṣṭomādāvanujñāyate, na ca tathā vastuviṣaye iha advaitaṃ brahma utsargeṇa pratipādya punaḥ tadekadeśe apavadituṃ śakyate, brahmaṇaḥ*

*advaitatvādeva ekadeśānupapatteḥ । tathā vikalpānupapatteśca; yathā 'atirātre ṣoḍaśinaṃ gṛhṇāti' (?) 'nātirātre ṣoḍaśinaṃ gṛhṇāti' (?) iti grahaṇāgrahaṇayoḥ puruṣādhīnatvāt vikalpo bhavati ; na tviha tathā vastuviṣaye dvaitaṃ vā syāt advaitaṃ veti vikalpaḥ sambhavati, apuruṣatantratvādātmavastunaḥ, virodhācca dvaitādvaitatvayorekasya। tasmāt na suvivakṣitā iyaṃ kalpanā। śrutinyāyavirodhācca। saindhavaghanavat prajñānaikarasaghanaṃ nirantaraṃ pūrvāparabāhyābhyantarabhedavivarjitaṃ sabāhyābhyantaram ajaṃ neti neti asthūlamanaṇvahrasvamajaramabhayamamṛtam — ityevamādyāḥ śrutayaḥ niścitārthāḥ saṃśayaviparyāsāśaṅkārahitāḥ sarvāḥ samudre prakṣiptāḥ syuḥ, akiñcitkaratvāt। tathā nyāyavirodho'pi, sāvayavasyānekātmakasya kriyāvato nityatvānupapatteḥ; nityatvaṃ ca ātmanaḥ smṛtyādidarśanāt anumīyate; tadvirodhaśca prāpnoti anityatve; bhavatkalpanānarthakyaṃ ca; sphuṭameva ca asminpakṣe karmakāṇḍānarthakyam, akṛtābhyāgamakṛtavipraṇāśaprasaṅgāt। nanu brahmaṇo dvaitādvaitātmakatve samudrādidṛṣṭāntā vidyante; kathamucyate bhavatā ekasya dvaitādvaitatvaṃ viruddhamiti? na, anyaviṣayatvāt; nityaniravayavavastuviṣayaṃ hi viruddhatvam avocāma dvaitādvaitatvasya, na kāryaviṣaye sāvayave। tasmāt śrutismṛtinyāyavirodhāt anupapanneyaṃ kalpanā। asyāḥ kalpanāyāḥ varam upaniṣatparityāga eva। adhyeyatvācca na śāstrārthā iyaṃ kalpanā; na hi jananamaraṇādyanarthaśatasahasrabhedasamākulaṃ samudravanādivat sāvayavam anekarasaṃ brahma dhyeyatvena vijñeyatvena vā śrutyā upadiśyate; prajñānaghanatāṃ ca upadiśati; 'ekadhaivānudraṣṭavyam' (bṛ. u. 4।4।20) iti ca; anekadhādarśanāpavādācca 'mṛtyoḥ sa mṛtyumāpnoti ya iha nāneva paśyati' (bṛ. u. 4।4।19) iti; yacca śrutyā ninditam, tanna kartavyam; yacca na kriyate, na sa śāstrārthaḥ; brahmaṇo'nekarasatvam anekadhātvaṃ ca dvaitarūpaṃ ninditatvāt na draṣṭavyam; ato na śāstrārthaḥ; yattu ekarasatvaṃ brahmaṇaḥ tat draṣṭavyatvāt praśastam, praśastatvācca śāstrārtho bhavitumarhati। yattūktaṃ vedaikadeśasya aprāmāṇyaṃ karmaviṣaye dvaitābhāvāt, advaite ca prāmāṇyamiti — tanna, yathāprāptopadeśārthatvāt; na hi dvaitam advaitaṃ vā vastu jātamātrameva puruṣaṃ jñāpayitvā paścātkarma vā brahmavidyāṃ vā upadiśati śāstram ; na ca upadeśārhaṃ dvaitam, jātamātraprāṇibuddhigamyatvāt; na ca dvaitasya*

*anṛtatvabuddhiḥ prathamameva kasyacit syāt, yena dvaitasya satyatvamupadiśya paścāt ātmanaḥ prāmāṇyaṃ pratipādayet śāstram। nāpi pāṣaṇḍibhirapi prasthāpitāḥ śāstrasya prāmāṇyaṃ na gṛhṇīyuḥ। tasmāt yathāprāptameva dvaitam avidyākṛtaṃ svābhāvikam upādāya svābhāvikyaiva avidyayā yuktāya rāgadveṣādidoṣavate yathābhimatapuruṣārthasādhanaṃ karma upadiśatyagre; paścāt prasiddhakriyākārakaphalasvarūpadoṣadarśanavate tadviparītaudāsīnyasvarūpāvasthānaphalārthine tadupāyabhūtām ātmaikatvadarśanātmikāṃ brahmavidyām upadiśati। athaivaṃ sati tadaudāsīnyasvarūpāvasthāne phale prāpte śāstrasya prāmāṇyaṃ prati arthitvaṃ nivartate; tadabhāvāt śāstrasyāpi śāstratvaṃ taṃ prati nivartata eva। tathā pratipuruṣaṃ parisamāptaṃ śāstram iti na śāstravirodhagandho'pi asti, advaitajñānāvasānatvāt śāstraśiṣyaśāsanādidvaitabhedasya; anyatamāvasthāne hi virodhaḥ syāt avasthitasya; itaretarāpekṣatvāttu śāstraśiṣyaśāsanānāṃ nānyatamo'pi avatiṣṭhate; sarvasamāptau tu kasya virodha āśaṅkyeta advaite kevale śive siddhe; nāpyavirodhatā, ata eva। athāpi abhyupagamya brūmaḥ — dvaitādvaitātmakatve'pi śāstravirodhasya tulyatvāt; yadāpi samudrādivat dvaitādvaitātmakamekaṃ brahma abhyupagacchāmaḥ nānyadvastvantaram, tadāpi bhavaduktāt śāstravirodhāt na mucyāmahe; katham? ekaṃ hi paraṃ brahma dvaitādvaitātmakam; tat śokamohādyatītatvāt upadeśaṃ na kāṅkṣati; na ca upadeṣṭā anyaḥ brahmaṇaḥ; dvaitādvaitarūpasya brahmaṇaḥ ekasyaiva abhyupagamāt। atha dvaitaviṣayasya anekatvāt anyonyopadeśaḥ, na brahmaviṣaya upadeśa iti cet — tadā dvaitādvaitātmakam ekameva brahma, nānyadasti iti virudhyate। yasmindvaitaviṣaye anyonyopadeśaḥ, saḥ anyaḥ dvaitaṃ ca anyadeva iti samudradṛṣṭānto viruddhaḥ। na ca samudrodakaikatvavat vijñānaikatve brahmaṇaḥ anyatra upadeśagrahaṇādikalpanā sambhavati; na hi hastādidvaitādvaitātmake devadatte vākkarṇayoḥ devadattaikadeśabhūtayoḥ vāk upadeṣṭrī karṇaḥ kevala upadeśasya grahītā, devadattastu na upadeṣṭā nāpyupadeśasya grahītā — iti kalpayituṃ śakyate, samudraikodakātmatvavat ekavijñānavattvāt devadattasya। tasmāt śrutinyāyavirodhaśca abhipretārthāsiddhiśca*

*evaṃkalpanāyāṃ syāt* । *tasmāt yathāvyākhyāta eva asmābhiḥ pūrṇamadaḥ ityasya mantrasya arthaḥ* ॥